
Volume - XVIII Jan-June 2021 ISSN 2320-2025

# व्यासश्रीः

# VYASAŚRIH

*A Bilingual Refereed Research Journal of Indology*

(UGC CARE LISTED)



Padmashree Professor Ramayatna Sukla felicitation volume

**: Chief Editor :**

Dr. Buddheswar Sarangi

*Publisher*

**Maharshi Vyasadev National Research Institute**

**Vedavyas, Rourkela-4, Odisha**

**email : vyasasri12@gmail.com**

**vist us : www.vyasasri.com**

विषयसूची

सृष्टिः स्रष्टा पृष्ठम्

* पद्मश्रीरामयत्नशुक्लमहोदयानां संक्षिप्तेतिवृत्तम् (iii-xv)
** प्रास्ताविकम् (x-xi)
*** सूचीपत्रम् (xii-xv)

१. शास्त्रानुसन्धाने अर्वाचीनधारा
बुद्धेश्वरषडङ्गी 1

२. व्याकरणाध्ययनस्य गूढार्थविमर्शः
ड. पुनम सिं 8

३. विभक्त्यर्थप्रकाशे दर्शितानां शिष्टप्रयोगाणां विमर्शः
ड. श्रीमन्तभद्रः 17

४. अग्निपुराणदृष्ट्या कारकतत्त्वपरिशीलनम्
डॉ. सुजितमाइतिः 32

५. शिक्षकप्रशिक्षणे सूक्ष्मशिक्षणस्य वैशिष्ट्यम्
डॅ. सहेलि मजुमदार 46

६. यौगिकी शक्तिपातदीक्षा
वाचस्पतिशास्त्री जोशी 53

७. संस्कृतवाङ्मये कविवररमाकान्तशुक्लस्य योगदानम्
शुभम् मुखोपाध्यायः 63

८. समासप्रकरणे उपसर्जनस्य महत्वम्
चिन्मयः मण्डलः 76

९. अतिदेशसूत्राणां सादृश्यमूलकत्वम्
शम्पा पाल 96

१०. अभिज्ञानशकुन्तलनाटकस्य प्रथमाङ्के अलंकारध्वनि विचारः
मन्टेश्वरः वर्मन् तथा आचार्या सुदेष्णा भट्टाचार्या 104

११. रावणसंहितानुसारं पञ्चमभावसमीक्षणम्
डॉ. विश्वरञ्जनपतिः 120

१२. नित्यमोक्षस्य ज्ञानसाध्यत्वविचारः
डॉ सोमा बन्दोपाध्याय 130

१३. वैदिक भाषा में लेट् लकार एक विवेच्य विषय 136
डॉ. नवीन कुमारी

१४. सांख्यदर्शने प्रमाणस्वरूपम् 142
गीताञ्जलिः त्रिपाठी

१५. वङ्गप्रदेशस्य अर्वाचीनदूतकाव्यपरिचयः 150
टीना मण्डल

१६. वैदिकवाङ्मये भक्तिः 156
डॉ. शत्रुघ्नपाणिग्राही

१७. शिशुपालवधस्य काव्यशास्त्रीयं समीक्षणम् 161
डॉ. बाबूलालमीना

 ISSN 2320-2025

# नित्यमोक्षस्य ज्ञानसाध्यत्वविचारः

डॉ. सोमा वन्द्योपाध्याय

ननु अद्वैतवेदान्तानां मते मोक्षस्य ज्ञानसाध्यत्वाभ्युपगमात् कथमस्य अनित्यत्वं नापतेत्? पुरुषेच्छायत्नचेष्टादिव्यापारसाध्यत्वात् यथा घटादेः अनित्यत्वं साधितं वादिभिः तथैव पौरुषेयज्ञानसाध्यत्वात् मोक्षस्यापि अनित्यत्वमस्तु। तत्रोच्यते -- यो यो भावपदार्थोऽत्र कृतिसाध्यो दृश्यते तत्र तस्य अनित्यत्वे नास्ति कस्यापि विसंवादः। अतो धर्मादीनां भाववस्तूनां पुरुषयत्नविशेषसम्पादितत्वात् अनित्यत्वमेव। मोक्षस्तु ब्रह्मस्वरूपः इच्छाकृतिचेष्टादिभिः न केनापि उत्पादितः। अतः साध्यत्वाभावात् कथं तस्यानित्यत्वम्? नित्यसिद्धं नित्यप्राप्तमपि वा ब्रह्म अनाद्यविद्यावशादेव जीवानां सविधेऽप्राप्तमिव अनित्यमिव वा प्रतिभाति। यथा मोहवशात् स्वकण्ठगतोऽपि हारः अप्राप्त इति अपहृत इति वा प्रतीयते, किन्तु विशेषसमीक्षया स्वकण्ठस्थदर्शनादेव मोहभङ्गे सति पूर्वप्राप्तोऽपि (पूर्वतः स्वकण्ठस्थितोऽपि) हारः पुनः प्राप्त इव मन्यते, तथैव ब्रह्मविज्ञानेन ब्रह्म ज्ञानतिरोधाने सति नित्यप्राप्तमपि ब्रह्म पुनः प्राप्तमिवानुभूयते। न पुन एतेन ब्रह्मणः मोहस्य वा वास्तविकं प्राप्तत्वम् अनित्यत्वं वा सिध्यति। वस्तुतस्तु ज्ञानेन ब्रह्मविपयकमनोवृत्त्या वा अज्ञाननिवृत्तिरेव भवति न तु ब्रह्माव्याप्तिः, वृत्तेः अज्ञाननाशकत्वनियमात्। स्वतःसिद्धन्तु ब्रह्म स्वयमेव प्रकाशते। अतो ज्ञानसाध्यत्वम् अविद्यनिवृत्तिमात्रनिष्ठम्, न तु पुनः ब्रह्मनिष्ठमिति ब्रह्मभावस्य मोक्षस्य ज्ञानसाध्यत्वाभावात् अनित्यत्वं न स्यात्। अयम् आशयः -- धर्मादिः खलु सर्वदा कर्मानुष्ठानसापेक्ष एव भवति। अतो धर्मादेः पुरुषव्यापारसाध्यत्वमस्तु। मोक्षस्तु न तथा